[illegible]रामायणम् ।

मिथिलादेशान्तर्गत गोतमाश्रम
निवासिना श्री सीतारामचरणाब्ज
चञ्चरीकेण परम भागवतेन
श्री ललितकिशोरी शरणेन
प्रणीतम्-

मुजफ्फरपुर मण्डलान्तर्गत कोरखहिया निवासिना
श्री बद्री सिंह, अधिवक्ता द्वारा
सम्मुद्रय मुद्रितम् ।

१९७६
श्री १०८ श्री ललितकिशोरी शरणस्य किंकरानुकिंकर
श्री १०८ श्री रामकृपालु शरण जी महाराज
अहिल्या स्थान द्वारा प्रकाशित एवं ललित
प्रिंटिंग प्रेस, लहेरियासराय द्वारा मुद्रितम् ।

अथ प्रणवे रामायणम्

ओमित्येकाक्षरं ब्रह्म ओमित्येकाक्षरं परम् ।
ओमित्येकाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥
आद्यं यत्र्यक्षरं ब्रह्म त्रयो यस्मिन्प्रतिष्ठिता ।
स गुह्यो न्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् ॥
ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥

प्रणवः सर्ववेदेषु ओङ्कार वाच्यस्त्वं राम ॥ ओमित्येतदक्षरमुद्गीथमुपासीत । ओमित्येतदक्षरमिद ग्वं सर्वं तस्योपव्याख्यानम् । भूतं भवद्भविष्यदिति सर्वमोङ्कार एव ओम्३ खं ब्रह्म इत्यादि श्रुतिस्मृतिभिः प्रणवस्यैव वेदत्वं सर्वाधिक्यं प्रतिपादितम् ॥ वाल्मीकिना च रामायणस्य वेदसम्मितत्वमुक्तम् ।

इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितमिति

अतः कतिपयरामायणस्य श्लोकाः प्रणवार्थे समन्विताः प्रकाशन्ते तत्र प्रथमं व्याकरणादोम् शब्दार्थं प्रतिपाद्य तत्तदर्थे तत्तच्छ्लोकान्समन्वयामः ॥ अव रक्षण गति कान्ति प्रीति तृप्त्यवगमप्रवेश स्वाम्यर्थ याचन क्रियेच्छा दीप्त्यवाप्त्यालिङ्गन हिंसा दान भागवृद्धिषु ॥ यद्यपि

धातवोऽनेकार्थास्तथापि प्रधानतयाऽष्टादशार्थकादव धातोर्मन् प्रत्ययस्तस्य टि लोपो धातोर्वस्य रुडादेशे गुणश्चेत्यौणादिक ओं शब्दः सिद्धस्तत्र अवति रक्षतीति ओम्।

रक्षिता जीवलोकस्य धर्म्मस्य परिरक्षिता।
रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता।

अयं श्लोको रक्षार्थे समन्वितः १ अवति रक्षार्थं गच्छतीति ओम्

यदा व्रजति संग्रामं ग्रामार्थे नगरस्य वा॥
गत्वा सौमित्रिसहितो नाविजित्य निवर्तते।

इति गत्यर्थान्वयः ॥२॥ अवतिकान्तो भवति शोभते प्रीयते दीप्यतेचेति ओम् ॥ तत्र शोभार्थे, यथा—

तया स राजर्षिसुतोभिकाम्यया। समेयिवान्नुत्तम राजकन्यया॥ अतीवरामः शुशुभे मुदान्वितो। विभुः श्रिया विष्णुरिवामरेश्वरः ॥३॥

प्रीतिदीप्त्योश्च।

दान्तैः सर्वप्रजाकान्तैः प्रीतिसंजननैर्नृणाम्।
गुणैर्विरोचते रामो दीप्तः सूर्य्य इवांशुभिः ॥४॥
सूर्य्यस्यापि भवेत्सूर्य्यो ह्यग्नेरग्निः प्रभोः प्रभुः॥
तन्तपत्तमिवादित्यमुपपन्नं स्वतेजसा॥

ववन्दे वरदं वन्दी विनयज्ञो विनीतवत् इति ॥४॥

अवगमोऽज्ञानं अवति सर्वं जानातीति ओम्। तत्र यथा—

सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान्।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ॥५॥

प्रीतावप्यस्य समन्वयः ॥५॥ तृप्तौ यथा। अवति तर्पयति तोषयति इति ओम्।

प्रहृष्टमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः॥
निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः ॥६॥

प्रवेशे यथा—अवति तेजसा प्रविशतीति ओम्।

आविष्टं तेजसा रामं संग्रामशिरसि स्थितम्।
दृष्ट्वा सर्वाणि भूतानि भयाद्विव्यथिरे तदा। ७॥
विवेश वैष्णवं तेजः सशरीरः सहानुजः।. इति ॥७॥

स्वाम्यर्थे च। स्वामी लोकस्य राघवः।

त्रैलोक्यमपि नाथेन येन स्यान्नाथवत्तरम्।
शक्तस्त्रैलोक्यमप्येष भोक्तुं किन्न महीमिमाम्।।इति॥८॥

अर्थयाचने यथा। अव्यते सर्वैः स्व स्वार्थो याच्यते इति ओम्। कर्मणि प्रत्ययः।

स्त्रियोवृद्धास्तरुण्यश्च सायं प्रातः समाहिताः॥
सर्वान् देवान्नमस्यन्ति रामस्यार्थे मनस्विनः।

तेषां तद्याचितं देव त्वत्प्रसादात्समृद्ध्यताम् इति ॥९॥ ऐतेन रामस्य राज्ये सततं याचित्वा वयं धनवन्तः स्याम इति गम्यते सर्वः स्वार्थं समीहत इत्युक्तेः।५। क्रियायां

यथा। अवति लोकसेतुं करोति कारयतीति वा ओम् ॥ मर्य्यादानां हि लोकस्य कर्त्ता कारयिता च सः ॥

क्रियाभियोगं मनसः प्रसादं
समाधियोगानुगतं च कालम् ।।
सहायसामर्थ्यमदोनसत्वः
स्वकर्म हेतुं च कुरुष्व तात ।।१०।।

आयकर्मण्युपायज्ञ संदृष्टन्य कर्मवित्। तथाच श्रुतिरपि। एष सेतुर्विधरणामसंभेदाय लोकानामिति। गीताच,—

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः।।१०।

इच्छार्थे यथा। यद्यपि आप्तकामस्य ब्रह्मण इच्छाऽभावस्तथापि लोकवत्तु लीला कैवल्यमिति ब्रह्मसूत्र न्यायाद्भक्तानुग्रहलोकानुग्रहेच्छा सर्वदा विद्यते। अवति स्वाश्रिता भयादिमिच्छतीति ओम्।

सकृदेव प्रपन्नाय, तवाऽस्मीति च याचते।
अभयं सर्वभूतेभ्यो, ददाम्येद्व्रतं मम इति ।।११।।

अवाप्तौ यथा। अवति क्रीडार्थं राज्यादिकं प्राप्नोतीति ओम्।

धनुर्वेदविदां श्रेष्ठो लोकेतिरथसम्मतः।

अभियाना प्रहर्ता च सेनानय-विशारदः।

रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवानिति ॥१२॥

आलिंगे यथा ॥ अवतिप्रसन्नतया स्वाश्रितानालिङ्गति परिष्वजतीति ओम् ॥

सुसंहृष्टः परिष्वज्य बाहुभ्यां लक्ष्मणं तदा।
अतिस्निग्धं च गाढं च वचनं चेदमब्रवीत् ॥
प्रीतोस्मि ते महत्कर्म त्वयाकृतमिदं प्रभो।
प्रदेयोयन्निमित्तं ते परिष्वङ्गो मया कृतः॥

एष सर्वस्व भूतो मे परिष्वंगो मयाकृतः।
बभूव हृष्टा वैदेही भर्तारं परिषस्वजे।

रामं चैवाव्ययं दृष्ट्वा तुतोष जनकात्मजा।
ततस्तुतं राक्षससंघ मर्दनं, संपूज्यमानं मुदितैर्महात्मभिः॥
पुनः परिष्वज्य मुदान्वितानना, वभूब हृष्टा जनकात्मजा तदा। इति ॥१४॥

हिंसार्थे यथा ॥ अवति राक्षसान् हन्तीति ओम्।

हन्त्येष नियमाद्वध्या न वध्येषु न कुप्यति।
पुनक्त्यर्थेः प्रहृष्टश्च तमसो यत्र तुष्यति। तेन तत्रैव वसता जनस्थाननिवासिनाम्। रक्षसां निहतान्यासन्सहस्राणि चतुर्दश। इति ॥१५॥

दानार्थे यथा। अवति ददातीति ओम्।

द्विर्ददाति न चार्थिभ्यो रामोद्विर्नाभि भाषते।

रामोऽपि परमोदारः सुमुखःसु महायशाः । इति । १६ ॥

भागे यथा । अवति भगवान्भवतीति ओम् ॥

भग एव भागः । षड्विधैश्वर्य्यैः ।

ऐश्वर्य्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।

ज्ञानवैराग्योयश्चैव षण्णां भगइतीरणा । तत्रैश्वर्य्ये ।

सर्वाँल्लोकान् सुसंहृत्य सभूतान् सचराचरान् ।

पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः । धर्मे यथा ।

धर्मकामार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।

लौकिके समयाचारे कृतकृत्यो विशारदः ।

यशो ज्ञानयोर्यथा ।

यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ॥

श्रियां यथा—प्रजापतिसमः श्रीमान् ।

लक्ष्मीवांच्छुभलक्षणः ॥ वैराग्ये यथा—

नाहमर्थपरो देवि विद्धि मामृशिसन्निभम् ।

सोहं वनं गमिष्यामि यक्त्वा मुनिवदामिषम् ॥

राज्यं वा वनवासो वा वनवासो महोदयः इति १७ ॥

वृद्धौ यथा—अवति कीर्त्यादिभिर्वर्द्धतीति ओम् ।

बहुश्रुतानां वृद्धानां ब्राह्मणानामुपासिता ।

तेनास्येहातुलाकीर्तिर्यशस्तेजश्च वर्धते ॥ १८ इति ॥

एवञ्च ओमित्येवं ध्यायथ अन्यावाचोविमुञ्चथ

अमृतस्यैषसेतुः। तस्य वाचकः प्रणवः तज्जपस्त-
दर्थभावनम् ॥

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ॥

इत्यादि श्रुतिस्मृतयः। साकारस्यैव ब्रह्मणो ध्यानं त्रिद्भवति निराकारे ब्रह्मणि सम्पूर्णो विधात्वर्थो न समन्वीयते साकारे तु सर्वार्थः संघटते। निराकारे शोभा न संभवति इच्छादानेच नघटतः॥ भगश्च सर्वथा नैवसमन्वेति। अतः साकारएव प्रणव वाच्य ईश्वरः। श्रुतिरपि--इन्द्रस्यबाहु हरीतइन्द्र श्मश्रूणि सइषुहस्तैः सनिषंगिभिः सर्वंश्रष्टा जगृम्भाते दक्षिणमिन्द्रहस्तम्। हस्तौ पृणस्व बहुभिर्वसव्यै राप्रयच्छ दक्षिणद्रुतसव्यात् इत्यादिः। साकारमेव प्रतिपादयतीति साकार ऐवेश्वरो ध्येयो ज्ञेयश्चेति ॥

अथ प्रणव निरुक्तिः।

प्रकर्षेण नूयते स्तूयते इति प्रणवः। तत्राक्षर मात्रस्य स्तुत्य संभवात्। वाच्यवाचकयोरभेद इति शाब्दिक सिद्धान्तात्। प्रणवाभिधेय ईश्वर एव स्तव-नीय उपास्यश्चेति-तथाच श्रुति स्मृतय। अभित्वा-शूरनोनूमो दुग्धा इव धेनवः ॥

ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥१॥

अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् ॥ होतारं रत्न धातमम् ॥२॥

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनै रुत ॥
सदेवानिह वक्ष्यति ॥३॥ स्तुषेय्यंपुरू ।
वर्पसमृभ्व मिनतम माप्त्यमाप्त्यानाम् ।

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतस्तुन्वति दिव्यैस्तवैः ।
वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ॥
ध्यानावस्थिततद्गतेन मनसा, पश्यन्ति यं योगिनो ।
यस्यान्तं न विदुः सुरासुरगणाः देवाय तस्मै नमः ॥४॥
ध्येयं सदा परिभवघ्नमभीष्टदोहं ।
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्तिहं प्रणतपालभवाब्धिपोतं ।
वन्दे महापुरुष ते चरणारविन्दम् ॥५॥ इति ।

प्रकृत्या सहितः श्यामः पीतवासा जटाधरः ।
द्विभुजः कुण्डली रत्नमाली धीरोधनुर्धरः ॥१॥
प्रसन्नवदनो जेता धृष्ट्याष्टकविभूषितः ।
प्रकृत्या परमेश्वर्य्या जगद्योन्याङ्किताङ्कभृत् ॥२॥
हेमाभया द्विभुजया सर्वालङ्कारयाचिता ।
श्लिष्टः कमलधारिण्या पुष्टः कोशलजात्मजः ॥३॥
दक्षिणे लक्ष्मणो नाथ सधनुः पाणिना पुनः ।

हेमाभेनानुजेनैव तदा कोणत्रयं भवेत् ॥४॥
तथैव तस्य मन्त्रस्य यश्चाणुश्च स्वङ्गे तया ।
एवं त्रिकोण रूपंस्यात्तं देवा येसमाययुः ।
स्तुति चक्रश्च जगतः पतिकल्पतरौस्थितम् ॥५॥
कामरूपाय रामाय नमो मायामयायच ।
नमो वेदादि रूपाय, ओङ्काराय नमोनमः ॥६॥
रमाधाराय रामाय श्रीरामायात्ममूर्तये ।
जानकी देह भूषाय रक्षोघ्नाय शुभाङ्गिने ॥७॥
भद्राय रघुवीराय दशास्यान्तकरूपिणे ॥८॥

इति प्रणव निरुक्तिः ।

अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इति ।

छान्दोग्योपनिषदि

प्रणवोद्गीथ शब्दयोःपर्य्यायत्वमुक्तम् । अत उद्गीथ निरुक्तिरप्युच्यते । उत्=आरभ्य गायतीति उद्गीथः । उत्तमं ब्रह्म गायति उपासतेऽनेन प्रतीकेनेतिवा । उत्कृष्टतया गीयते वा उदितं । पापादि रहितं ब्रह्म गायतीति वा उद्गीथः । तत्र आरभ्य गायति यथा ओमित्युद्गायति । तस्योपव्याख्यानमिति गायति उपासते-ऽनेनेति यथा । धनुर्गृहीत्वौपनिषदं महास्त्रं शरंह्युपाशा निशितं सन्धयीत आयम्यतद्भाव गतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धिणप्रवोधनुः शरोह्यात्मालक्ष्यंतद्ब्रह्म उच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयोभवेत् ॥२॥

आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्। ध्यान निर्मंथनाभ्यां च देवं पश्येन्निगूढ़वत्॥ तिलेषु तैलं दधिनीव सर्पिरिति। उत्कृष्टतया गीयते यथा। सएषर-सानांरसतमः। परमः परार्द्ध्यो यदुद्गीथ इति। उदितं गायति यथा। तस्मात्वेवोद्गाते तस्यहि गाता तद्यहमे वीणायां गायन्त्ये तं ते गायन्ति तस्मात्तो धनसनय इति।

तन्त्रे रामतापनीयेच ओम् शब्दयोः पर्य्यायत्वमुक्तम्।

प्रणवो मे शिरःपातु तारको ब्रह्मरूपकः।

अनन्तोऽग्न्यासनः सेन्दुर्नासामेकाक्षरोऽवतु॥

इति तन्त्रे।

तारकं दीर्घानलं विन्दु पूर्वकंदीर्घानलंपुनर्माय नमः। चन्द्राय नमः भद्राय नमः। इति। ओं तत् ब्रह्मात्मकाः सच्चिदानन्दाख्या इत्युपासितव्यम्। अकारः प्रथमाक्षरो भवति। उकारो द्वितीयाक्षरो भवति। मकारस्तृतीयाक्षरो भवति। अर्द्धमात्रश्चतुर्थाक्षरो भवति। विन्दुः पञ्चमाक्षरो भवति। नादः षष्ठाक्षरो भवति। तारकत्वात्तारको भवति। तदेव तारकं ब्रह्मत्वं विद्धि। तदेवोपास्यमितिज्ञेयम्॥ गर्भ जन्म जरा मरण संसार महद्भयात् सन्तारयतीति तस्मादुच्यते तारकमिति। यएतत्तारकं ब्राह्मणो नित्य-मधीते ससर्वं पाप्मानं तरति स मृत्युं तरति। स ब्रह्म-हत्यां तरति. स भ्रूणहत्यां तरति, स वीरहत्यां तरति, स सर्वहत्यां तरति, स संसारं तरति, स सर्वं तरति, सो-

ऽविमुक्तमाश्रितो भवति, स महान् भवति, सोऽमृतत्वंच गच्छतीति ॥ अथैते श्लोका भवन्ति ।

अकाराक्षर सम्भूतः सौमित्रिर्विश्व भावनः ।

उकाराक्षर सम्भूतः शत्रुघ्नस्तैजसात्मकः ॥

प्रज्ञात्मकस्तु भरतो मकाराक्षर सम्भवः । अर्द्धं-मात्रात्मकोरामो ब्रह्मानन्दैक विग्रहः ॥ श्रीराम सान्निध्य वशाज्जगदानन्द दायिनी । उत्पत्तिस्थिति संहार कारिणी सर्वदेहिनाम् ॥ सासीता भवतिज्ञेया मूलप्रकृति संज्ञिता । प्रणवत्वात्प्रकृतिरिति वदन्ति ब्रह्मवादिन इति । छन्दसि बहुलमिति सूत्रात् रमुक्रीड़ायामिति धातुतः ओम् रांशब्दौच साधितौ भवति तथाचोच्यते । घञन्ताद् रमते-र्घञलोपे राम् भवति दीर्घाभावे अकार रेफयोर्व्यत्यये कृते अरम् इतिस्थितिः । ततोविसर्गे उत्वे अउम् इति-स्थितिः ततो गुणेकृते "ओम्" इति अतो रमयति रसतम तया सर्वान् सुखयतीति ओम् । तथा च श्रुतिः सएष रसानाग्वं रसतमः परमः परोर्द्धेयग्दुद्गीथ इति रमन्तेऽनन्तान्द स्वरूपेऽस्मिनितिराम् । तथाचश्रुतिः

रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि । इति रामपदेनासौपरं ब्रह्माभिधीयत इति

रामएव राम इति स्वार्थाण्णन्तान्साधुः । अधिकरणे घञन्तात्तुलोकेपि राम इति प्रसिद्धः । अतो रां जपे ओं जपेच स भ्रातृकः ससीतः सच्चिदानन्दः कोशलेन्द्रः सर्वा-

धिपः श्री जानकीबल्लभः श्री रामभद्रएव ध्येयोज्ञेय-श्रुति। एवं रामौं शब्दयोः पर्य्यायत्वमुक्तम्। तथा चनिगमः। अथ खलु यउद्गीथः सप्रणवो यः प्रणवः सउद्गीथ इत्यसौ वा आदित्य उद्गीथ एषप्रणवओमितिह्येषस्वर श्रुति इति प्रणवस्यादित्य दृष्टयोपासनमुक्तम्॥ 'सचन्त यदुषसः सूर्य्येण चित्रामस्य केतवो राम विन्दन्। आयन्नक्षत्रं ददृशे दिवो न पुनयतो न किरद्धानु वेद। इति ऋग्वेदेऽष्टमाष्टके षष्ठाध्याये रामितये काक्षंरस्यादित्ये श्रीःप्रकाश लक्ष्मीरुक्ता वाल्मकीयेऽपि सूर्य्यस्यापि भवत्सूर्य्योह्यग्नेरग्निः प्रभोः प्रभुः। श्रियः श्री श्रभवेद-ग्न्या कीर्त्याः कीर्त्तिः क्षमा क्षमा इति सूर्य्यस्यपि प्रकाशो रामादेव भवतीत्युक्तम्। गीतायामपि—"यदा-दित्यगतं तेजो जगद्भासयतेऽखिलं। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धिमामकमिति। श्रुतौ च—नतत्र सूर्य्योभाति न चन्द्र तारकं नेमाविद्युतो भान्ति कुतो यमग्निः। तमेव भान्तमनुभाति सर्वं तस्यभासा सर्वमिदं विभातीति अतो य ओंवाच्यः सएव रां वाच्यो योरांवाच्यः स ओं वाच्य इति श्रुतिस्मृतिसिद्धान्तः।

अथ स चन्त इत्यस्य भाष्यम्।

यद यदा उषसः उषः काला सूर्य्येण सचन्त संगच्छन्ते तदानीं अस्य सूर्य्यस्य केतवः रश्मयः चित्रा रां रायं श्रियमविन्दन्। अलभन्त पुनः उदयानन्तरम्।

यत् यदा दिवोनक्षत्रं न ददृशे न दृश्यते तदानीं यतः सर्वत्र गच्छतः अस्य सूर्य्यस्य रश्मीन् नकिनुवेद न कश्चित जानाति एतत् अद्धासत्यमेव। अत्रचित्रामिति विशेषणेन आश्चर्यो लब्धा कुशलो स्यवक्ता आश्चर्यो ज्ञाता कुशलानुशिष्टः। आश्चर्य्यंवत् पश्यति कश्चिदेनम्। इति श्रुतिस्मृत्युक्तं ब्रह्मणः प्रकाश रूपत्वं दुर्ज्ञेयत्वमुक्तम्।

॥ इति श्री ललित किशोरी शरण कृत प्रणवरामायण भाष्य सहित समाप्तम्।